International Journal of Sanskrit Research 2023; 9(6): 04-07

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(6): 04-07
© 2023 IJSR
www.anantaajournal.com
Received: 07-09-2023
Accepted: 10-10-2023

**Dr. Thakur Rana**
Faculty of Sanskrit, Kalahandi University, Odisha, India

**Corresponding Author:**
**Dr. Thakur Rana**
Faculty of Sanskrit, Kalahandi University, Odisha, India

# स्मृतेदत्तकविमर्शः

**Dr. Thakur Rana**

**सारांश**
साम्प्रतं समाजे सर्वाषां गृहस्थीनां कृते पुत्रस्यावश्यकता नितरां जायते एव। द्वादशविधाः पुत्राः दरीदृश्यते स्म, तेषु औरसपुत्रः आद्य पधानञ्च भजते स्म। परन्तु तस्या भावेन दत्तकः पुत्रः स्वीकर्तव्यः । लेखेऽस्मिन् दत्तकग्रहणस्य विधिः, काल, वयः, अपितु दत्तक जेकथं ग्राहय भवति? केन ग्रहणं भवति? कः योग्यः? इत्यादयः विषयः समालोचितः। सदैव पुत्रस्यावश्यकता वर्ततैव, कारणं तस्य माध्यमेन कूलस्य संवर्धनं भवति । पुं नाम नरकात् त्रायते इति हेतोः पुत्रस्यावश्यकता नितरां वर्ततैव । अपुत्रककूलः विनाश प्रायः संलक्ष्यते सदैव अतः पुत्रस्यावश्यकता नितरां वर्तते । साम्प्रतं समाजेऽस्य प्रभावः वहुधा दृश्यते यत् यस्य औरस पुत्रः न सन्ति सः अन्येपुत्राः गृहन्तैव। तत् तु सजातीय वा विजातीयः भवतु।

**कूटशब्द :** दत्तकः, पुत्रः, त्रिभिऋणैः, श्रुतेः, स्मृतिः, नरकम्, औरसः, द्वादशविधाः पुत्राः, सजातीयः, विजातीयः, सपिण्ड, समानगोत्रः, सोदर, ग्रा। आय, आधुनिक-हिन्दुविधौ, मातृपितृहीनः, संस्कार, रामायण, दशरथ, पौराणिक, मन्त्र, विवाह, दायाद

## प्रस्तावना

जायमान ह वै ब्राह्मणस्त्रिभिऋणैऋणिवान् जायते, ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजाय पितृभ्य इति श्रुतेः पुत्रस्यानृण्यहेतुताश्रवणात् तद्भावे च पित्रर्णग्रस्तरुपप्रत्यवाय स्मरणात् पुत्रस्यावश्यकता सुतरां वर्त्तते इति नास्ति विप्रतिपत्तिः। पुंन्नाम्नो नरकात् त्रायते इति पुत्रशब्दस्य व्युत्पत्तेरपि पुत्रस्य पितृनरकोद्धरणे प्रयोजनीयता प्रतिपाद्यते। प्रसङ्गेऽस्मिन्नुक्तं मनुना[1] यत्-

> पुंनाम्नो नरकाद्यस्मात्त्रायेते पितरं सुतः।
> तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा।। इति।।

पुनश्चपुत्रपौत्रादिद्वारा स्वर्गाऽऽनन्त्यादिविशिष्टलोकप्राप्तिरलोकतापरिहारश्च क्रियत इति मनुना[2] समुद्घोषितम्। यथोक्तं तेन –

> पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते।
> अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विषृपम् ।। इति ।।

यद्यपि पुत्रशब्देन सामान्यत औरस एव गृह्यते तथापि तदभावे अन्ये एकादशविधापुत्रा तस्य प्रतिनिधयो भवन्ति। अत एवोक्तं मनुना [3] -

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।
गूढोत्पन्नोऽपविद्धश्च दायादबान्धावाश्च षट ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।
स्वयंदत्तश्च शौद्रश्च षडढायादबान्धावाः ॥ इति ॥

एतेषु मुख्यः औरसः तदभावे एकादशगौणपुत्रेषु दत्तकोऽन्यतमः। स च दत्तकः कः, कीदृशः, केन ग्राह्यः, केन देय, कथञ्च ग्राह्य इति क्रमेण प्राचीनाधुनिक विधि विमर्शपूर्वकं विचार्यते।
तत्रादौ दत्तकः कः, तस्य कि स्वरुपं, स च कीदृशः इति जिज्ञासायां मनुना[4] प्रतिपादितम् यत् –

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः॥इति ॥

पुनश्च सजात्तीयेष्वपि प्रोक्तस्तनयेषु मया विधिरिति[5] याज्ञवल्क्य वचनाच्च प्रतिग्रहीतुः सन्निहितसगोत्र-सपिण्डेषु कश्चन दत्तकत्वेन ग्राह्य इति बोध्यते। तत्रापि प्रथमं समानगोत्रः सपिण्डः तद्भावेऽसमानगोत्रसपिण्डसमानागोत्रासपिण्डयोरन्यतरः तदभावे च असमानगोत्र- सपिण्डोऽपि ग्राह्यः। परन्तु असमानजातीयः कदापि न ग्राह्यः। प्रसङ्गेऽस्मिन् मनुना[6] सोदरभातुष्पुत्र एव पुत्रकार्य इत्युक्तम्। तद्यथाः-

भ्रातृणामेकजातानामेकश्चेत् पुत्रवान् भवेत्।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥इति ॥

परन्तु सोदाहरणं भ्रातृभगिनीनां मध्ये परस्परं पुत्रगृहीतृत्वं नास्ति। अर्थात् भगिन्या भ्रातृपुत्रो भ्रात्रा वा भगिनीपुत्रो दत्तकत्वेन न ग्राह्यः। अतः भ्रातृपुत्राभावे कश्चन भ्राता स्वप्रत्यासन्नं सजातीयमेव पुत्रत्वेन गृहीयात्। प्रसङ्गेऽस्मिन्नुक्तं शोनके[7] यत् –

सर्वेषामेव वर्णानां जातिष्वेव न चान्यतः।
दौहित्रो भागिनेयश्च शूद्रस्तु क्रियते सुतः॥
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्॥इति ॥

अनेन वचनेन दौहित्रभागिनेयो केवलं शूद्रेण ग्राह्यौ। यदि अन्यजातीतः कदाचित् दौगौत्रादिकं पुत्रत्वेन स्वीकरोति तर्हि सोऽभाक् न भवतीति शौनकेन प्रतिपादितम्। परन्तु कथञ्चदपि कश्चन अवैधोपायेनोत्पतोऽज्ञातकुलशीलः पुत्रत्वेन न ग्राह्यः, न वा एको भ्राता भ्रात्रन्तरं पुत्रत्वेन ग्रहीतुं शक्नोति। किञ्च एकपुत्रोऽपि न दयो नापि ग्राह्यः। न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद् वेति वसिष्ठवचनात्।[8]
परन्तु सम्प्रति आधुनिकहिन्दुविधौ[9] दत्तकः सजातीयो विजातीयो वा हिन्दुरेव भवेदिति नियमः प्रवर्त्तितः। एको मातृपितृहीनः अवेधोत्पादितः पुत्रोऽपि सम्बन्ध्य सम्बन्धि निर्विशेषेण दत्तकत्वेन ग्राह्यो भवति।

**दत्तकस्य वयः –** चूडाकरणात् प्राक् दत्तको ग्राह्य इति प्रथमः पक्षः। तदन्तरं प्रागुपनयनाद् ग्राह्य इति द्वितीयः। पञ्चमाब्दचूडाकरणस्य परमावधिरिति हेतोः पञ्चवर्षात् प्राक् दत्तको ग्राह्यः। यथोक्तं कालिकापुराणे [10] -

चूडोपनयनसंस्कारा नजगोत्रेण वै कृताः।
दत्ताद्यास्तनयास्ते स्युरन्यया दास उच्यते ॥
ऊर्द्धं तु पञ्चमाद् वर्षान्न दत्ताद्याः सुता नृप।
गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत्॥इति ॥

परन्तु दत्तकः परिणीतः उत्पन्नपुत्रोऽपि भवतीति नीलकण्ठभट्टतातचरणैः श्रीमच्छङ्करभट्टैः प्रतिपादितम्। अनेन द्विजातीनामुपनयनात् प्राक्शूद्रस्य च विवाहात् प्राक् दत्तको ग्राह्य इति समाधातुं शक्यते।
सम्प्रति हिन्दुविधौ दत्तकः ऊनपञ्चदशवर्षीयोऽवश्यमेव- भवेदिति नियमः प्रवर्तितः। प्राप्ते पञ्चदशे वर्षे दत्तकत्वं तस्य निषिध्यते। परन्तु पुरातनपरम्परामनुसृत्य वम्बे-पञ्जावप्रभृतिप्रदेशेषु क्वचित् पञ्चदशवर्षीयस्य ततो अधिकवयः सम्पन्नस्यापि दत्तकत्वं दृश्यते।
प्राचीनकाले पुत्र इव कन्यापि दत्तकात्वेन गृह्यते स्म। यथोक्तं मनुना[11] –

अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकामिति।
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम्॥इति ॥

रामायणे दशरथः स्वकन्यां शान्तां लोमपादाय पुत्रीत्वेन दत्तवानिति प्रमाणमप्यस्ति। सम्प्रति हिन्दुविधौ कन्यापि दत्तका भवति परन्तु एकाकन्या एकेन ग्रहीतुं शक्यते नाधिका यया एक एव पुत्र गृह्यते तया। अत एक एव जनः एकं पुत्रं एकस्य कन्यां दत्तपुत्ररुपेण दत्तकन्यारुपेण च ग्रहीतुं शक्नोति।

**केन दत्तको ग्राह्यः**

अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः॥इति ॥

अत्रिवचनात्[12] अपुत्रणैव दत्तको ग्राह्यः न पुत्रवता। अत्रापुत्रशब्देन मृतपुत्रः अजातपुत्रो वेति नन्दपण्डितस्याभिप्रायः। अनेन ब्रह्मचारी, विवाहितो, विधुरः बन्ध्यो वा यः कोऽप्यपुत्रो दत्तकं ग्रहीतुं समर्थः। परन्तु दत्तकतत्प्रतिग्रहीत्रोर्मध्ये किमपि वयोव्यवधानं न नियमकमासीत्। यद्यपि पुत्रवता विश्वामित्रेण देवरातादि-पुत्रप्रतिनिधिगृहीत इति पौराणिकी वार्त्ता श्रूयते, तथापि चण्डालपकश्वडधनभक्षणवदसाधारणकर्मकर्त्तुर्नियमातिक्रमो न दोषायेति मत्वा तदस्माभिर्न ग्राह्य इति विचार्यते । पुनश्च दत्तपुत्रग्रहणे पुमानेवाधिकारी न स्त्री । यथोक्तं वसिष्ठेन[13] न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयद्वाऽन्यत्रानुज्ञानाद्भर्तुरिति। अनेन वचनेन विधवाया भत्रभावात् दत्तकग्रहणेऽनधिकारो गम्यते । साधवापि भत्रनुज्ञा विना पुत्रं ग्रहीतुमसमर्था। अपि च पुत्रग्रहणकाले व्याहृतिभिः होमस्य विधानात् देवस्य त्वेत्यादिवैदिकमन्त्रोच्चारणस्य कर्त्तव्यत्वाच्च स्त्रीणां वेदमन्त्रेषु होमेषु चानधिकारात् स्त्रिया पुत्रग्रहणेऽधिकारो नास्तीति ज्ञायते। परन्तु साम्प्रतिकहिन्दुविधौ अविवाहिता-विवाहिता -बन्ध्या-विधवा-पतिपरित्यक्ता-विवाहोच्छिन्नादिसर्वविधायाः प्रसवयस्कायाः स्त्रीयाः पुत्रग्रहणेऽधिकारो वर्त्तते। पुनश्च यदि कश्चन विवाहितः पुरुषः दत्तकं गृह्णाति । तर्हि स तस्य पत्न्या अनुमत्यैव पुत्रं गृह्णीयात्, अन्यथा दत्तकग्रहणमसिद्धं भवेत् । पत्न्याऽनेकाश्चेत् सर्वासामुमतिरपेक्ष्यते। यदि कस्याचित् पत्नी सन्न्यासिनी विकृतमस्तिष्का भवति अथवा तस्या हिन्दुत्वमवसितं तर्हि तस्या स्त्री भर्त्रनुमतिं विना दत्तकं ग्रहीतुमपि न समर्था। परन्त्वविवाहिता-विधवा-विछिन्नविवाहा पुत्रप्रतिग्रहेऽधिकारिणी । सधवापि यदि तस्या भर्त्तुर्विकृतमस्तिष्कत्वं सन्यासित्वं वा प्रमाणितम्। अथवा तस्या हिन्दुत्वमवसितं तर्हि सपि भर्त्तृपरतन्त्रं विना दत्तकग्रहणे समर्था। परन्तु तत्रेयान् विशेषो यत् यदा कश्चन पुरुषः कन्यां दत्तकात्वेन गृह्णाति स्त्री वा काचित् पुत्रं दत्तकत्वेन गृह्णाति तर्हि उभयत्र मातापुत्रयोः पितृकन्ययोश्च वयोव्यवधानं न्यूनातिन्यूनम् एकविंशतिवर्षाणि भवेयुरन्यथा दत्तकग्रहणमसिद्धं स्यात्।

**दत्तकः केन देयः**

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुत।।इति ।।

अनेन मनुवचनेन[14] ज्ञायते यत् मात्रा पित्रा पितृभ्यां वा दत्तको देयः। पिता स्वतन्त्ररुपेण माता च पितुरनुमत्येति विशेषः। परन्तु विधवा स्वतन्त्ररुपेण पुत्रदानेऽधिकारिणी भवति । मातरं पितरं च विना नान्यः कोपि दत्तपुत्रदाने प्रभुः। साम्प्रतिकहिन्दुविधौ यदि माता विकृतमस्तिष्का रुपेण न प्रामाणिता न वा सन्यासिनी न वा तस्या हिन्दुत्वं छिन्नं तर्हि तस्या अनुमतिं विना पितुः पुत्रप्रदानेऽधिकारो नास्ति। परन्तु विमातुः क्रूरदृष्टेः करणात् पिता स्वपुत्रं यस्मै कस्मै प्रदातुं प्रभवति । तत्र विमातुरनुमतिर्नापेक्ष्यते । तदवत् कश्चित् माता स्वकीयमवैधसन्तानं स्वभर्त्तुरनुमतिविनापि दत्तकत्वेन यस्मै कस्मै दातुं प्रभवति । परन्तु स्वभर्तुः सन्तानं स्वतन्त्रभवेन तदानीमेव दातुं प्रभवेत् यदा तद्भर्त्ता सन्यासी, विकृतमस्तिष्कसम्पन्न इति प्रामाणितः अथवा तस्य हिन्दुत्वमवसितं नान्यथा । सम्प्रति हिन्दुविधौ कश्चन अभिभावकोऽपि पुत्रदाने प्रभुर्भवति यदि तत्पित्रोरनुमतिः स्यात् । पित्रोरभावे स यदि तत्पुत्रस्य संरक्षकः तर्हि तस्याप्यधिकारो विद्यते ।

**दत्तकः कथं ग्राह्यः**

धर्मशास्त्रानुसारेण पुत्रं प्रतिग्रहीष्यत् जनः पूर्वेद्युरुपवासेन स्थित्वा आचार्यं राजानां बन्धूश्चाहूयं संपूज्यं ब्राह्मणात् भोजयित्वा अग्न्याधनाद्याज्योत्पवनान्तं कर्म कृत्वा दातुः समक्षं गत्वा पुत्रं देहीति याचेत। ततो देवस्य त्वेत्यादिमन्त्रेण शिशुं हस्ताभ्यां परुगृह्य अङ्कात् अङ्गादिति ऋचं जप्त्वा शिशोः मूर्धनि आघ्राय वस्त्रादिभिरलंकृत्य पुत्रं गृह्णीयात् । परन्तु साम्प्रतिकहिन्दुविधौ तथा नियमो नास्ति न दत्तहोमस्यावश्यकता नवोपवासस्य। केवलं पुत्रदाता शिशुं बाहुभ्यमुत्थाय प्रतिग्रहितृकोले सस्थाप्य वदति यत् मयापुत्रोऽयं तुभ्यं दत्तः कन्या वा तुभ्यं दत्ता। प्रतिग्रहीता वदति मया शिशुरयं पुत्रत्वेन कन्यात्वेन वा परुगृह्यत इति। सर्वविधकृत्येषु व्यवहारेषु श्राद्धशुद्धिदायग्रहणादिकर्मसु दत्तकः औरसवत् परिगृह्यते। दत्तके कृते औरसे समुत्पन्ने और सस्य धार्मिककृत्येष्वेवाधिकारः दायभागविषये तु औरसेन सहानुकृत्यप्रातिकूल्यादिस्थितिविचारदृष्ट्या क्वचित् चतुर्थ/पञ्चम/षष्ठांशादिप्राप्तिः धर्मशास्त्रेषु स्वीक्रियते । आधुनिक हिन्दुविधौ तु तुल्यो दायाधिकार इति।।

## References

1. म.स्मृ-9/137
2. म.स्मृ-9/138
3. म.स्मृ-9/169,160
4. म.स्मृ-9/168

5. या.स्मृ.व्य-133
6. म.स्मृ-9/182
7. द.मी.पृ-75
8. द.मी.पृ-88
9. मडर्नहिन्दु ल पृ.225
10. व्य.म.पृ-71
11. म.स्मृ.9/127
12. द.मी.पृ-3
13. द.मी.पृ-13
14. म.स्मृ-9/168